MSK-8
Block-1

ଓଡ଼ିଶା ରାଜ୍ୟ ମୁକ୍ତ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ସମ୍ବଲପୁର
Odisha State Open University
Sambalpur

# MASK
*MASTER OF ARTS*
**SANSKRIT**

# ANCIENT INDIAN HISTORY AND CULTURE

## Indian Civilization

ଓଡ଼ିଶା ରାଜ୍ୟ ମୁକ୍ତ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ସମ୍ବଲପୁର, ଓଡ଼ିଶା
Odisha State Open University, Sambalpur, Odisha
Established by an Act of Government of Odisha.

# Master of Arts in Sanskrit (MASK)

## SK-08

## ANCIENT INDIAN HISTORY AND CULTURE

# Block -I

## INDIAN CIVILIZATION


| | |
|---|---|
| UNIT- 1 | VARNA SYSTEM: GENESIS AND GROWTH |
| UNIT-2 | SARASVATI VALLEY CIVILIZATION |
| UNIT-3 | VEDIC CIVILIZATION |
| UNIT-4 | VEDIC RELIGION |

MASK PROGRAMME

## EXPERTS COMMITTEE

**Prof. Prafulla Kumar Mishra, Former Vice-Chancellor, North Odisha University**

**Prof. Raghunath Panda , Retd. Prof, Utkal University**

**Prof. Gopal Krishna Dash, Retd. Prof. , Utkal University**

**Dr. Madhusudan Mishra, Controller of Exams , Sri Jagannath Sanskrit University, Puri**

**Dr. Harmohan Mishra , Reader ( Retd.)**

**Dr. Kadambini Dash , Reader in Sanskrit, SB Women's College,**

**Dr. Debabrata Mohapatra , Sr . Lect. In Sanskrit, Emartidevi Women's College,Cuttack**

**Dr. Nibedita Pati, Lecturer in Sanskrit , S.B Women's College**

## CONVENOR

**Dr. Dillip Kumar Nayak , Reader in Odia ,**
**Former Officer In Charge, Regional Centre, B.J.B Auto. College Bhubaneswar**

## COURSE WRITER

**Dr. Subash Chandra Dash , Utkal University , Vanivihar**

## COURSE EDITOR

**Edited by – SLM Editorial group, OSOU**

## PROGRAMME COORDINATOR

**Dr. Sareeta Pujari , Senior Academic Consultant, OSOU , Sambalpur**

**Mr. Pratap Kumar Meher , Academic Consultant , Sanskrit , OSOU, Sambalpur**

## MATERIAL PRODUCTION

**Dr. Manas Ranjan Pujari**
**Registrar**
**Odisha State Open University, Sambalpur**

(cc) OSOU, 2020. *Indian civilization is* made available
under a Creative Commons Attribution-ShareAlike 4.0
http://creativecommons.org/licences/by-sa/4.0
Printed by :

# UNIT – I – INDUS VALLEY CIVILIZATION

## १.१ प्राचीनेतिहासस्य प्रामाणिकतथ्यानि

१.१.१ खोदितलेखः लिपिश्च

१.१.२ प्रत्नतात्त्विकावशेषः स्थापत्यम् च

१.१.३ मुद्राः

## १.२ साहित्यिकमुपादानम्

१.२.१ धर्मसम्बन्धीयसाहित्यम्

१.२.२ जनसाहित्यम्

१.२.३ वैदेशिकविवरणी

## १.३ सिन्धुसभ्यतायाः सामाजिकजीवनपद्धतिः नगरपरिकल्पना, गृहनिर्माणादिकम्

१.३.१ नगरपरिकल्पना

१.३.२ मार्गाः

१.३.३ सर्वसाधारणगृहः

१.३.४ शस्यागारः

१.३.५ वृहत्स्नानागाराणि

१.३.६ उदकनिष्कासनव्यवस्था

१.३.७ वर्ण्णाः

१.३.८ भक्षणपदार्थाः

१.३.९ वस्त्राणि

१.३.१० अलङ्काराः

१.३.११ मनोरञ्जनकार्यम्

१.३.१२ गृहोपकरणद्रव्याणि

१.३.१३ शिक्षा

१.३.१४ युद्धसामग्रीपदार्था:

१.३.१५ वृक्षपूजनम्

१.३.१६ धार्मिकविश्वास:

## १.१ प्राचीनेतिहासस्य प्रामाणिकतथ्यानि

प्राचीनभारतस्येतिहासस्य पुनर्निर्माणाय विभिन्नानामुपादानाानामावश्यकता वर्त्तते। एतेषामुपादानानां परीक्षणं कृत्वा सामग्रीकभावेन विवेचनं कृत्वा पुरातनेतिहासस्य रचना क्रियते येषां विषये प्रत्यक्षरूपेण न किञ्चित् उपलब्धं भवति। तेषु उपादानेषु मुख्यमुपादानं भवति – १) प्रत्नतात्विकोपादानम् २) साहित्यिकोपादानञ्च। प्रत्नतात्विकमुपादानं पुनः खोदितलेखः अथवा लिपिः, प्रत्नतात्विकावशेषः स्थापत्यञ्च, मुदा इति भेदेन त्रिधा विभज्यते। साहित्यिकमुपादानं पुनः धर्मसम्बन्धीयसाहित्य-लोकसाहित्य-वैदेशिक-विवरणी भेदेन त्रिधा विभज्यते।

आदौ एव प्रत्नतात्त्विकोपादान विषये आलोचनां करिष्यामः ।

### १.१.१ खोदितलेखः लिपिश्च

प्रत्नतात्त्विकोपादानेषु शिलालेखानां स्थानमतीव महत्त्वपूर्णं भवति। शिलालेखः केन लिखितः, कस्य राज्ञः समये लिखितः, कस्मिन्नुपरि लिखितः, लेखनस्य शैली कीदृशी आसीत्। शिलालेखस्य समयः इत्यादिषु विषयेषु विचारं कृत्वा शिलालेखविषये विवरणी प्रस्तुतीक्रियते। केषुचित् शिलालेखेषु राज्ञां राज्यशासन-राज्यविस्तार-पुष्करिण्याः उद्धार -राजनीतिविषयक-सामाजिकावस्थाप्रभृतिविषयेषु सम्यक् सूचना लभ्यते। तेषामनुशीलनं कृत्वा ऐतिहासिकसमयनिर्द्धारणं कुर्वन्ति। प्रस्तरगात्रे खोदितलिपीनां व्यतिरेकं ताम्रपट्टम्, लोहः, ब्रोन्ज्, सुवर्णम्, रौप्यञ्चैतेषां धातूनामुपरि भिन्नभिन्नाः लिप्यः लभ्यन्ते। शिलालेख-ताम्रफलक–सुवर्णरौप्यमुद्रादयश्च दीर्घशायिनः भवन्ति। अतः प्राचीनकाले राजानः खोदनार्थं एतेषां व्यवहारमकुर्वन्। केचन ताम्रपट्टानि सुवर्णरौप्यमुद्रादयश्च कालगर्भे निक्षिप्ताः। पुनः समुचितसमये तेषामुद्धारं कृत्वा अधुना तेषां विषयेऽध्ययनं क्रियते। तेषां परिशीलनं कृत्वा ऐतिहासिकोपादानानि प्रस्तुतं कृतवन्तः। खोदितलेखाः प्रायशः पालि-संस्कृत-ब्राह्मी-तामिलप्रभृतिभाषासु रचिताः। भारते स्थितशिलालेखेषु अशोकस्य सारनाथे स्थितः शिलालेखः, समुद्रगुप्तस्य प्रयागस्तम्भः, रुद्रदाम्नः गिर्णारप्रस्तराभिलेखः यशोधर्मणः मान्दासोरप्रस्तर- स्तम्भाभिलेखः, हर्षस्य वांशखेराताम्रपट्टाभिलेखः,

पुलकेशिनः ऐहेलशिलाभिलेखः च प्रधानाः। पुनश्च विभिन्नपुरातनमन्दिरगात्रेषु अपि शिलालेखः दृश्यते। पुरी-भुवनेश्वरप्रभृतिपुरातननगराणां प्राचीनमन्दिरेषु दृश्यते। तेभ्यः तेषां मन्दिराणां विषये तथा विभिन्नधर्माणामुत्थानपतनादिविषये धारणा लभ्यते।

## १.१.२ प्रत्नतात्विकावशेषः स्थापत्यम् च

हरप्पा-महेञ्जोदारोनगरयोः प्रत्नतात्विकखननेन प्रागैतिहासिकसिन्धुसभ्यतायाः सम्बन्धेन सूचना लभ्यते । अनेन भूखननेन पुरातनानि नगराणि लब्धानि। भूखननात् तत्कालीननगरव्यवस्था, गृहं, इष्टकं, स्नानागारादिविषये, प्रस्तरे भिन्नभिन्नमूर्त्तयः, लिपिः च प्राप्यन्ते । तत्कालीनलिपिः यद्यपि पठितुं न शक्यते, तथापि विभिन्नप्रस्तरस्थमूर्त्तयः अनेकपुरातनकथां प्रकाशयन्ति।

अनेकेषु अन्यस्थानेष्वपि भूखनेन विभिन्ननगराणि यथा तक्षशिला-पाटलीपुत्र-राजगृह-नालन्दा-साञ्ची-सारनाथप्रभृतीनि आविष्कृतानि। एषु स्थानेषु आविष्कृतानि नगर-भवन-मठ–प्रासाद - विश्वविद्यालयप्रभृतीनां भग्नावशेषाः विस्तृतं ज्ञानं प्रयच्छन्ति।

## १.१.३ मुद्राः

भूगर्भे लीनाः बहवः मुद्राः पुनरुद्धारं कृत्वा ऐतिहासिकाः तानि उपादानरूपेण व्यवहारं कृतवन्तः। भारतस्य सर्वप्राचीनमुद्रासु विभिन्नानि चित्राणि द्रष्टुं लभ्यन्ते। परन्तु परवर्त्तीकाले मुद्रासु राज्ञां चित्रं नाम अथवा देवानां चित्राणि अङ्कितानि दृश्यन्ते। समुद्रगुप्तस्य अश्वमेधसूचकमुद्राः तस्य पराक्रमं तथा तस्य दिग्विजयविषयकं सूचना प्राप्यते। तस्य अन्यमेकं वीणावादनप्रतिच्छवियुक्तमुद्राः राज्ञः सङ्गीतानुरागं सूचयति। पुनश्च ग्रीक्-कुशाण-शकप्रभृतिराज्ञां शासनं प्रभृतिविषयेषु यथेष्टमेतिहासिकं तथ्यं प्रददाति। मुद्रायामङ्कितमूर्त्तिचित्रात् तत्कालीन समाजस्य धर्मविषयेऽपि सूचना लभ्यते।

## १.२ साहित्यिकमुपादानम्

विभिन्नसाहित्यिकउपादानानि प्राचीनेतिहासनिर्माणाय सहायकानि भवन्ति। साहित्यिकमुपादानमपि त्रिधाविभक्तं भवति। यथा – धर्मसम्बन्धीयसाहित्यं, जनसाहित्यं, वैदेशिकविवरणी च ।

### १.२.१ धर्मसम्बन्धीयसाहित्यम्

प्राचीने भारते वहवः धर्माः विकशिताः अभवन्, तेषु ब्राह्मण्यधर्मः, बौद्धधर्मश्च मुख्यौ। प्राचीनभारतस्य धार्मिकव्यवस्थाविषये , सभ्यता तथा संस्कृतिविषये धर्मसम्बन्धीसाहित्यं ज्ञानं प्रयच्छति। तेभ्यः वेदाः, उपनिषदः, रामायणं, महाभारतं प्रभृतयः अन्यतमाः। प्राचीनभारतस्य राजवंशानां विषये पुराणानि सहायकानि भवन्ति। पुराणानि यथा – वायुपुराणं, मत्स्यपुराणं, ब्रह्मपुराणं, विष्णुपुराणं च विभिन्नराजवंशानां विषये तथा तेषां राज्यसीमाविषये तथ्यानि प्रयच्छन्ति। ब्राह्मण्यधर्मानन्तरं बौद्धधर्मस्य जैनधर्मस्य च प्रचारः अभवताम्। त्रिपिटकः, बौद्धजातकः, ललितविस्तारं, दीपवंशः महावंशश्च बौद्धधर्मविषये वर्णयन्ति। तादृशमङ्गमुपाङ्गं सूत्रग्रन्थमपि जैनधर्मेऽपि लभ्यन्ते।

### १.२.२ जनसाहित्यम्

प्राचीनभारतेतिहासं रचयितुं जनसाहित्यमपि सहायतां करोति। धर्मसूत्रं, मनुस्मृतिः, याज्ञवल्क्यस्मृतिः प्रभृति स्मृतिग्रन्थेषु सामाजिकनीति-राजनैतिकनीति-विभिन्नवर्णानां कर्त्तव्यं, संस्काराणि, विवाहप्रकारः, दण्डनीति प्रभृतयः वर्णिताः। कौटिल्यस्यार्थशास्त्रमपि अस्मिन् विषये प्रामाणिकं ग्रन्थं भवति। एते ग्रन्थाः न केवलं तत्कालीनसमाजस्य अपि तु तेषां पूर्ववर्त्तीसमाजस्य विषयेऽपि सूचना प्रददाति। पुनश्च प्राचीनकाव्य-नाटकरचयितृणां ग्रन्थाः अतीवोपादेयाः भवन्ति। विशाखादत्तस्य मुद्राराक्षसमतीवोपादेयम्। बाणभट्टस्य हर्षचरितमैतिहासिकं ग्रन्थं भवति। तत्र हर्षवर्द्धनस्य राज्यविस्तारं तत्कालीनान्येषां राज्ञां विषये, राज्यशासनविषये विस्तृततरूपेण तथ्यानि लभ्यन्ते। कल्हणस्य राजतरङ्गिणी काश्मीरदेशे राजत्वं कुर्वाणानां राज्ञां विषये सविशेषं वर्णनमुपलभ्यते।

### १.२.३ वैदेशिकविवरणी

प्राचीनभारतभूखण्डस्य ऐश्वर्यं द्रष्टुं बहवः वैदेशिकाः पर्यटकाः भारतभ्रमणाय आगतवन्तः। ते भारतस्य समग्रभारतभ्रमणं कृत्वा तेषामनुभूतिं वर्णितवन्तः। चन्द्रगुप्तस्य समये ग्रीक्राजदूतः मेघास्थिनिस् भारतभ्रमणे आगतवान्। सः पाटलीपुत्रनगर्यामवस्थानं कृत्वा चन्द्रगुप्तमौर्यस्य शासनव्यवस्थाविषये, सामाजिक-सांस्कृतिकजीवनशैलीविषये स्वस्वप्रसिद्धपुस्तके इण्डिकायां लिपिवद्धं कृतवान्। तथा हर्षवर्द्धनस्य समये प्रसिद्धः चीनपरिव्राजकः ह्वेनसां भारतपरिभ्रमणाय आगच्छत्। तस्य ग्रन्थात् विभिन्नराज्ञां शासनव्यवस्था-राज्यविस्तारविषये ज्ञायते। विशेषतः बौद्धधर्मविषये सम्यक्ज्ञानं भवति। विशेषरूपेण हर्षवर्द्धनस्य राज्यशासनकठोरदण्डव्यवस्था-प्रयागमेलाप्रभृतिषु विषये विशदभावेन सः वर्णयति।

एतानि प्रामाणिकतथ्यानि भवन्ति येषामाधारेण प्राचीनेतिहासस्य रूपरेखः ज्ञातुं शक्यते।

## १.३सिन्धुसभ्यतायाः सामाजिकजीवनपद्धतिः नगरपरिकल्पना, गृहनिर्माणादिकम्

पृथिव्याः प्राचीनतमसभ्यतासु सिन्धुसभ्यता अन्यतमा। इयं सभ्यता सिन्धुनद्याः कूले विकशितोऽभवत्। सार् जन् मार्शालमहोदयस्य नेतृत्वेन १९२१-२२ ख्रीष्टाब्दे भूखनेन इयं सभ्यता आविष्कृता। भूखननेन हरप्पामहोञोदारो नामकं नगरद्वयमाविष्कृतमभवताम्। हरप्पा पञ्जावप्रदेशस्य मण्टेगामारीमण्डलस्य रावीनदीकूले गठिता। महेञ्जोदारसभ्यता सिन्धुप्रदेशस्य लारकानामण्डलस्य सिन्धुनदीतटे गठिता अभवत्। सार् जन् मार्शालमहोदयस्य मतेन इयं सभ्यता ३२५० ख्रीष्टपूर्व २७५० ख्रीष्टपूर्वमध्ये संगठितः स्यात्। परन्तु अन्यः पाश्चात्यविद्वान् मर्टिमर् हुइलर् अस्याः सभ्यतायाः समयः २५०० ख्रीष्टपूर्वात्। ५०० मध्ये सीमितः। अस्मात् ज्ञायते यत् ३००० ख्रीष्टपूर्वात् सिन्धुसभ्यता तस्य पूर्णतालाभं कृतवान्।

### १.३.१ नगरपरिकल्पना

सिन्धुसभ्यतायाः नगरनिर्माणं अतीवरमणीयम्, ते सर्वे स्वबुद्ध्या नगरनिर्माणं कृतवन्तः। नागरिकजीवनदृष्ट्या सिन्धुसभ्यतायाः जनाः उन्नताः तथा प्रगतिशीलाश्च।

हरप्पासभ्यतायाः नगरी मुख्यतः द्विभागेन विभक्तम्। दुर्गाः उच्चस्थानेषु निर्मितः अभवन्। अत्र शासकाः ब्राह्मणाः उपवसन्ति स्म। निम्नस्थानेषु जनवसतिः गठितोऽभवत्। नगर्य्याः चतुपार्श्वे प्राचीराः आसन्। सिन्धुसभ्यतायां जनानां गृहाः भष्मइष्टकैः निर्मितः अभवत्। प्रत्येकेषु गृहेषु शयनकक्षः, वैठकगृहः एवं खाद्यसामग्रीगृहाश्च आसन्। पुनश्च स्नानागारः आसीत्। जलनिष्काषन्नार्थ क्षुद्रमाल्याः आसन्। गृहात् निर्गतः दूषितं जलं नालिमाध्यमेन निष्कासितम् अभवत्।

### १.३.२ मार्गाः

तत्र मार्गाः पूर्वात् पश्चिमं यावत् उत्तरात् दक्षिणं विस्तृतौ आसन्। मार्गाः उभयं समकोणेन संयुक्ताः कृतवन्तः। मार्गस्य प्रस्थम् उप इति अनुमीयते।

### १.३.३ सर्वसाधारणगृहः

महेञ्जोदारो नगर्य्याः वृहत् स्नानागारं निकषा एकं वृहत् गृहोऽपि आविष्कृतः अभवत्। अस्य गृहस्य दैर्घ्यः २३० फीट् प्रस्थः ७८फीट् इत्रत। अस्मिन् ३३ फीट् दैर्घ्यस्य वृहत्वारण्डाः इव संयुक्तः कृतवान्। अस्मिन् गृहे काष्ठैः निर्मितः स्तम्भाः गठिताः अभवन्। अस्य गृहविषये ऐतिहासिकानां भिन्नभिन्नमतानि उपलभ्यते।

### १.३.४ शस्यागारः

वृहत् शस्यागारमपि हरप्पाध्वंसावशेषात् आविष्कृतः अभवत्। एतत् शस्यागारं शस्यभण्डारमिति अनुमीयते। दैर्घ्यं भवति ५० फीट्पर्यन्तं, प्रस्थः २०फीट् पर्यन्तम् । एतानि शस्यगाराणि हरप्पासभ्यतायाः अर्थनैतिकसमृद्धिं प्रदर्शयन्ति।

### १.३.५ वृहत्स्नानागाराणि

महेञ्जोदारोसभ्यतायाः वृहत्स्नानागारः सिन्धुसभ्यतायाः एकः सुप्रसिद्धनिदर्शनरूपेण विवेचितो भवति। स्नानागारस्य दैर्घ्यः १८० फीट्पर्यन्तं, प्रस्थः १०८फीट्पर्यन्तं च आस्ताम्। स्नानागारेप्रवेशार्थमुभयपार्श्वे पावच्छाः आसन्। स्नानागारस्य भित्तयः सुदृढभावेन निर्मिताः आसन्। स्नानागारं निकषा कूपमेकमासीत्। तस्मात् स्नानागारपर्यन्तं जलानयमव्यवस्थाऽपि आसीत्। स्नानागारं परितः उद्यानानि अपि निर्मिताः आसन्।

### १.३.६ उदकनिष्कासनव्यवस्था

सिन्धुसभ्यतायाः नगरपरिकल्पनायाम् उदकनिष्कासनोपरि गुरुत्वारोपमभवत्। दूषितं-जलनिष्कासनार्थं नालस्य व्यवस्था आसीत्। मार्गमुभयतः नालाः निर्मिताः। आवर्जनानिष्कासनाय अपि समुचिता व्यवस्था आसीत्। अतः जनाः सुस्थजीवनयापनं कृतवन्तः, रोगाक्रान्तश्च नाभवन्।

### १.३.७ वर्णाः

समाजे भिन्नभिन्न वर्गाणां जनाः वसति स्म। तेषु संहतिरपि आसीत्। अनेन समाजे शान्तिः विराजते स्म। जनाः सुखेन निवसन्ति स्म।

### १.३.८ भक्षणपदार्थाः

सिन्धुसभ्यतायाः जनाः सुस्वादुकरखाद्यानि खादितवन्तः। तेषु गोधूमः, धान्यं, दुग्धं, फलानि मत्स्यमांसादिकमपि खाद्यरूपेण स्वीकृतवन्तः। दुग्धं तेषां मुख्यं पेयम्। गृहपालितपशवः यथा – गावः, महिषाः, मेषाश्च।

### १.३.९ वस्त्राणि

सिन्धुसभ्यतायाः जनाः तन्तुपशमयोः निर्मितवस्त्रान् परिधानं कृतवन्तः। पुरुषाः कटिवस्त्राणि अधोवस्त्ररूपेण शरीरस्योपरिभागे उत्तरीयञ्च परिधानं कृतवन्तः। नारीपुरुषयोर्मध्ये वस्त्रपरिधानदृष्ट्या प्रभेदः नासीत्। पुरुषाः नार्यश्च भिन्नभिन्नशैल्यां केशविन्यासः कृतवन्तः। पुरुषाः ओष्ठे अधिरञ्जनी लिप्तवन्तः। केचन मुखे श्मश्रुः अपि रचितवन्तः।

### १.३.१० अलङ्काराः

सिन्धुसभ्यतायाः पुरुषाः नार्यश्च धनी-निर्धनजनाश्च निर्विशेषेण अलङ्कारप्रियाः आसन्। अतः विभन्नानि अलङ्काराणि ते सर्वे व्यवहृतवन्तः। धनीजनाः सुवर्ण-रौप्य-हस्तिदन्तप्रभृतिमुल्यकवस्तुभिः निर्मितानि अलङ्काराणि व्यवहृतवन्तः। शङ्ख तथा हस्तीदन्तनिर्मितकङ्कस्य व्यवहारमासीत्। स्त्रियः कर्णेषु नासिकायामपि अलङ्काराणि व्यवहृतवन्तः।

### १.३.११ मनोरञ्जनकार्यम्

सिन्धुसभ्यतायाः जनाः मृत्तिकानिर्मितपशुपक्षिभिः क्रीडित्वा स्वमनोरञ्जनकुर्वन्। एतदतिरिच्च नृत्यगीतमाध्यमेन अवसरविनोदं कृतवन्तः।

### १.३.१२ गृहोपकरणद्रव्याणि

सिन्धुसभ्यतायाः जनाः गृहोपकरणाय शिला-ब्रोञ्ज-तम्बा-प्रभृतिभिः निर्मितानि पात्राणि व्यवहृतवन्तः। लौहस्य व्यवहारं ते न जानीतवन्तः। मृत्तिकानिर्मितपात्राणि तदा बहुलभावेन प्रचलितानि आसन्।

### १.३.१३ शिक्षा

सिन्धुसभ्यतायाः जनाः शिक्षाक्षेत्रेषु मिशरीयजनाः इव सुमेरीयजनाः इव एकप्रकारकं लिखनप्रणालीं व्यवहृतवन्तः। मोहरस्योपरि एकप्रकारका लिपिः दृश्यते। ताः लिप्यः दक्षिणतः वामं लिखिताः अभवन्।

### १.३.१४ युद्धसामग्रीपदार्थाः

सिन्धुसभ्यतायाः जनाः युद्धनिमित्ताय ब्रोञ्जप्रभृतिधातुभिः निर्मितानि अस्त्राणि व्यवहृतवन्तः। मृतजनानो मृतदेहान् अग्नौ दहनं कृतवन्तः। हरप्पासभ्यतायाः जनाः कलाप्रियाः आसन्।

### १.३.१५ वृक्षपूजनम्

सिन्धुसभ्यतायाः जनाः विभिन्नवृक्षान् पूजयन्ति स्म। निम्बवृक्षः वटवृक्षः च पूजितौ।

### १.३.१६ धार्मिकविश्वासः

सिन्धुसभ्यतायाः जनानां विश्वासः आसीत् यत् मृत्योः परं यदि कवरः दीयते, तर्हि आत्मनः सद्गतिप्राप्तिः भविष्यतीति। जनानां व्यवहारयोग्यान् पदार्थान् मृत्युसमये निक्षिप्तवन्तः। भूतपिशाचादिविषयेषु तेषां विश्वासः आसीत्।

अद्यावधि यावत् सिन्धु-सरस्वती सभ्यतायाः खननावसरे महेञ्जोदारो सर्ववृहत् नगरीरूपेण लभ्यते। सा नगरी शतं हेक्टरं यावत् व्याप्ता आसीत्। अधुना तस्यां नगर्य्यां इष्टकनिर्मितानि गृहाणि दृश्यन्ते। महेञ्जोदारो प्राचीनविश्वस्य वृहत्तमा नगरी, यत्र प्रायतः चतुःसहस्त्रं जनाः निवसन्ति स्म।

महेञ्जोदारोनगर्याः निर्माणशैली अद्वितीया, अन्य सिन्धु-सरस्वतीनद्यास्तीरे अवस्थिताः अन्ये नगराः अपि सुनिर्मिताः नियमानुसारं निर्मिताः। सर्वेषु भिन्नतापि दृश्यते। प्रत्येकवर्गस्य जनाः स्वसुविधानुसारं नगरस्य निर्माणयोजनां प्रस्तुवन्तः।

तत्र या मुख्ययोजना नगरनिर्माणक्षेत्रे विभागद्वयं वर्त्तते। एका क्षुद्रा उच्चस्थाने विद्यते। अन्या वृहती अधोभागे। नगरस्योपरिभागे वृहत्कायप्रासादाः, शस्यगृहं, खम्बयुक्तं विशालं भवनं वृहत्स्नानागारं च वर्त्तन्ते। नगरस्य अधोभागे क्षुद्रगृहाणि साधारणजनानां कृते वर्त्तन्ते।

एतत् नगरस्य भागद्वयं तत्कालीनसमाजस्य सामाजिकावस्थायां सूचयति। समाजस्य एकः वर्गः सामाजिकरूपेण उन्नतः, अन्यः वर्गः नोन्नतः। द्वितीये भागे कृषकाः व्यवसायकारिणः कलाकारश्च निवसन्ति स्म। नगरीमध्ये आलोकस्य यातायातार्थं सुविधापि आसीत्। नगरस्य चतुपार्श्वे प्राचीरं आसीत्। सिन्धु-सरस्वतीसभ्यतायां सुन्दरनगराणि आसन्। मुख्यपन्था, मुख्यमार्गः, संयोगीकरणमार्गः, नालव्यवस्थ, मुख्यनालव्यवस्था तथा प्रत्येकगृहस्य नालव्यवस्था इत्यादयः मुख्याः।

जलयोगाणस्य सुव्यवस्था आसीत्। अन्यथा वन्याजलेन नगरी प्लाविता स्यात्। जनाः स्वस्वगृहनिर्माणमकुर्वन् । अनेके कूपाः महेञ्जादारो सभ्यतायां दृश्यते। क्षुद्रनालिकाः निर्मिताः आसन्, याभिः वृहत्नदीभ्यः जलानयनं भवेत्। सिन्धु-सरस्वतीसभ्यताः प्रमुखविषयाः यथा (१) हस्ततन्त्रकार्य्यै पटुता (Craft Specialisation), २) वाणिज्यं (trade), ३) नगर्याः-निर्माणकौशलं, गृहाः, गृहनिर्माणार्थं नूतनद्रव्याणि, गृहं परितः प्राचीरं तथा मुख्यद्वारं (walls with the gateways), नालिकायां (drains with corbelled

arches of burnt bricks) , हस्ततन्त्रकार्यस्थावशिष्टांशं (remains of crafts), मुद्रा (seals) अलङ्कारा: प्रभृतय: ।

सिन्धुसरस्वतीसभ्यताया: एते विषये तत्कालीनसमाजस्य चित्रं प्रस्तुवन्ति।

## ३.१ ऋग्वेदीयसामाजिकजीवनम्

### ३.१.१ वर्णव्यवस्था

ऋग्वेदसमये समाजे वर्णव्यवस्था प्रचलिता आसीत् वा नेति इति विदुषां मतान्तरं दृश्यते। केचन विंद्वासः कथयन्ति यत् जातिव्यवस्था ब्राह्मणकालस्य कल्पना। ऋग्वेदस्य दशममण्डले विराटपुरुषस्य विभिन्नाङ्गात् चतुर्ण्णां वर्णानामुत्पत्तिरभवत्। अतः उच्यते –

**ब्राह्मणोऽस्य मुखमासीदवाहू राजन्यः कृतः।**
**ऊरु तदस्य यद् वैश्यः पद्भ्यां शूद्रोऽजायत।। (ऋग्वेदः (१०/९०/१२)**

विराटपुरुषस्य मुखात् ब्राह्मणः, वक्षप्रदेशात् क्षत्रियः, वाहुप्रदेशात् वैश्यः, ऊरुप्रदेशात् शूद्रः अजायन्त इति। अन्ये केचन विंद्वासः कथयन्ति यत् ऋग्वेदस्य दशममण्डलमर्वाचीनम्। परन्तु ऋग्वेदसमये जातिव्यवस्था नासीदिति। वैदिकाः पञ्जावप्रदेशात् सिन्धुपत्यकाप्रदेशात् क्रमशः पूर्वमागतवन्तः। तदनन्तरमेव जातिव्यवस्था उत्पनास्यादिति अनुमीयते। यदा आर्याः पूर्वं प्रति अग्रसराः अभवन्, तदा तत्रस्यानार्यजाति जनैः सह अवश्यं युद्धं स्यात्। क्षुद्रक्षुद्रगोष्ठीजनाः पराक्रमैः जनैः सह युद्धकरणेन पराजिताः अभवन्। क्रमशः पराक्रमशालिना शक्तिशालीराज्यस्य निर्माणमकरोत्। राज्यकार्यार्थं, राज्यरक्ष्यार्थं युद्धकरणाय क्षत्रियानां जन्म अभवत्। सर्वेषां कृते खाद्यपानीयार्थं खाद्यपानीयस्यावश्यकता तथा वाणिज्यव्यवसायार्थं, कृषिकार्यार्थं वैश्यजात्याः उत्पन्नः स्यात्। 'विश्' शब्दस्यार्थः उपवेशनम्। यदा स्थिररूपेण वसतिस्थापनं कृत्वा कृषि-पशुपालन-वाणिज्यप्रभृतिकार्यं कृतवन्तः। ते यत्त न्यवसन्। तत् 'विशा' इति कथ्यते। क्रमशः वैश्याः कृषि-पशुपालन वाणिज्यप्रभृतिकार्यं कृतवन्तः।

तदनन्तरं धर्मकार्यार्थं पुरोहितजात्याः समुत्पन्नः स्यात्। जनवसतिः वृद्धिप्राप्तवती। सर्वेषां जनानां मनांसि धर्मचारणार्थं अस्योत्पत्तिः स्यात्। ऋग्वेदस्य परवर्त्तीसमये धार्मिककर्मकाण्डानि बहुलभावेन प्रसारितानि, देवानां सन्तुष्टकरणाय यज्ञादीनाभावश्यकता स्यात् । यज्ञेषु हव्यरूपेण दुग्धं, घृतं, अन्नं प्रदीयते। वृहत्यज्ञानुष्ठानाय

पुरोहितानामावश्यकः तदाऽऽसीत्। अतः पुरोहितस्य प्राधान्यमवर्द्धत। ते ब्राह्मणसंज्ञकाः अभवन्। क्रमशः ब्राह्मणानां कुलपरम्परा यज्ञानुष्ठानं, पूजादिकरणञ्च।

ऋग्वेदस्य पुरुषसूक्ते प्रथमं तावत् 'शूद्रः' शब्दस्योल्लेखः दृश्यते। 'दस्यु' 'दास' इति शब्दद्वयं अनार्याणां कृते व्यवहृतम्। 'दासजनाः दस्युजनाश्च वने ग्रामगठनं कृत्वा अवसन्। क्रमशः ते जनाः आर्याणां वशतां स्वीकार्य तेषां गृहेषु दासरूपेण कार्यं कृतवन्तः। इदं ज्ञायते यत् ऋग्वेदकाले वर्णव्यवस्था परम्परागतं नासीत्। वर्णव्यवस्था कर्मोपरि न्यस्ता। अर्थात् ये जनाः यादृशकर्मणि दक्षाः, ते तदवर्णसंज्ञकाः। यथा - ये राज्यरक्षाकार्यं कुर्वन्ति, ते क्षत्रियाः, इत्थमन्येऽपि। ये यज्ञकार्यादिकं अकुर्वन् ते ब्राह्मणाः, ये पशुपालनं व्यवसायादिकं कार्याणि कृतवन्तः ते वैश्यसंज्ञकाः, ये एतेषां सेवामकुर्वन्, ते शूद्रसंज्ञकाः च।

### ३.१.२ परिवारः

वैदिककाले परिवारः पितृकैन्द्रिकः आसीत्। पिता गृहपतिः आसीत्। पुत्र-कन्या-पुत्रवधू – अन्ये बान्धवाश्च सानन्दं जीवनयापनमकुर्वन्। गृहपतिः सर्वेषां प्रति आदरं, स्नेहञ्च प्रदर्शयति स्म। आवश्यकस्थले कठोरदण्डमपि प्रयच्छति स्म। पितापुत्रकन्यादीनां लालनपालनं- शिक्षादीक्षा, तेषां भविष्यतविषये च यत्नशीलः अभवत्। पितुः अनुपस्थितिसमये ज्येष्ठपुत्रः गृहस्य कर्त्तारूपेण कार्यनिर्वाहमकरोत्। ब्राह्मणग्रन्थेषु 'कुल' पदं प्रयुक्तः तस्मात् ज्ञायते यत् समाजे क्षुद्र-क्षुद्रपरिवारेषु विभक्तः। पितापुत्रयोर्मध्ये प्रगाढस्नेहः विद्यमानः आसीत्। पोष्यपुत्रग्रहणं केवलं पुत्रस्याभावे परिवारस्य वर्द्धनार्थं प्रचलितमासीत्। योग्यज्ञानी जनः सादरं पोष्यपुत्ररूपेण गृह्यते। यथा – विश्वामित्रः शुनःशेपं पुत्ररूपेण गृहीतवान्। पितुः अनुपस्थितिसमये ज्येष्ठभ्राता भ्रातृजाया च अन्येषां सर्वेषाम् अनुजानां कार्यं सम्पादयतः। गृह्यसूत्रे तत्कालीनपारिवारिकजीवनस्य सुन्दरं चित्रं वर्णितं दृश्यते। प्रत्येकगृहस्थ षोडशसंस्कारैः जीवनस्य गतिः आसीत्। १) गर्भाधान, २) पुंसवन, ३) सीमन्तोनयनं, ४) जातकर्म, ५) नामकरणं, ६) निष्क्रमणं, ७) अन्नप्रासनं, ८) चूडाकर्मं, ९) कर्णच्छेदः, १०) उपनयनं, ११) वेदारम्भः, १२) समावर्त्तनम्, १३) विवाहः, १४) वानप्रस्थः, १५) सन्यासं, १६) अन्त्येष्टिः च। प्रत्येकं गृहस्थं प्रत्यहं पञ्चमहायज्ञानि कृतवान्। १) ब्रह्मयज्ञं, २) पितृयज्ञं, ३)देवयज्ञं, ४) सूत्रयज्ञं, ५) अतिथियज्ञं च।

गृह्यसूत्रानुसारं अष्टविधपाकयज्ञानि कृतवान् गृहस्थः। १) अष्टकः, २) श्रावणी, ३) आग्रहायणी, ४) चैत्री, ५) अश्विनी, ६) फाल्गुनी, ७) पार्वणं, ८) श्राद्धञ्च। जीवनं चतुर्धा विभक्तमासीत्। १) ब्रह्मचर्यं, २) गार्हयस्थं, ३) वानप्रस्थं, ४) सन्यासञ्च। यः वर्णाश्रमधर्मं न पालयति स्म सः हीनरूपेण समाजे अतिष्ठत्। यज्ञाधिकारात् वञ्चितः अभवत्।

मानवजीवने परमपुरुषार्थलाभार्थं आश्रमाणां सृष्टिः। चतुर्वगफलप्राप्तिः हि लक्ष्यं भवति। ब्रह्मचर्याश्रमे ब्रह्मचारीरूपेण गुरुगृहे तिष्ठन् भिक्षाटनं कृत्वा शिक्षालाभं कृतवान्। पञ्चविंशतिवर्षाणि यावत् गुरुगृहे अतिष्ठन्। गुरोः आश्रमात् समावर्त्तनानन्तरं गृहमागत्य विवाहं कृत्वा गृहस्थाश्रमे प्रविशति। प्रत्यहं पञ्चमहायज्ञानि अष्टपाकयज्ञानि च गृहस्थः अकरोत्। सुन्दर-सुवल-सन्तानोत्पादनं कृत्वा तस्य शिक्षादीक्षानन्तरं तस्योपरि परिवारस्य भारं समर्प्य वानप्रस्थाश्रमम् अगच्छत्। आश्रमेऽस्मिन् भिक्षुरूपेण एकाकी तिष्ठति स्म, तदा कौपीनधारणं, फलमूलैः जीवनयापनं, अन्येषामुपदेशप्रदानञ्च तस्य प्रधानमुद्देश्यम्।

चतुर्थाश्रमः सन्यासाश्रमः फलमूलैश्च जीवनयापनमकुर्वन्। अग्निहोत्र-पञ्चमहायज्ञ-फलमूल-पत्रस्य वलिप्रदानं च प्रथमं कर्त्तव्यम्। पत्न्या सह तपस्याचरणं पुरुषः अकरोत्। बौद्धायनपरिव्राजकाय भिक्षुशब्दः प्रयुज्यते। महर्षिः गौतमः वानप्रस्थीजनानां कृते 'भिक्षु' शब्दं प्रयोगं कृतवान्।

### ३.१.३ विवाहः

ऋग्वेदकालीन विवाहप्रथा न कठोरा। अन्यायैः सह क्रमशः आर्याः विवाहं कृतवन्तः। अतः विवाहकरणार्थं ते नियमान् प्रचलितवन्तः। आवश्यकस्थले ब्राह्मणपुरुषः शूद्र-वैश्य-क्षत्रिय-जातीयकन्यया साकं विवाहं करिष्यति। क्षत्रियः वैश्यकन्यया सह विवाहं करिष्यति, परन्तु नीचजातिपुरुषेण सह उच्चजातिसम्पन्नानारी विवाहार्थं वारणं क्रियते। मिश्रविवाहः असवर्णविवाहः क्रमशः जातिभेदं तिक्त्तं कृतवान्। तदा अनुलोमविवाहस्य प्रतिलोमविवाहस्य च प्रचलनमासीत्। अनुलोमविवाहे उच्चजातिसम्पन्नः पुरुषः नीचजातिसम्पन्नः स्त्रिया सह विवाहः कृतवान्। तयोः सन्तानानि नूतनजातेः कारणं स्यात्। प्रतिलोमविवाहः नीचजातिसम्पन्नेन पुरुषेण सह उच्चजातिसम्पन्ना नारी विवाहं करोति। तयोः सन्ततिः एकं नूतनजातेः कारणं स्यात्।

यजुर्वेद-सामवेद-अथर्ववेद-ब्राह्मणसमये च वर्णव्यवस्थासम्पूर्णरूपेण विकशिता अभवत्। जातिप्रथा वंशपरम्परागतमभवत्। यथा- यः लौहकार्यं करोति सः कर्मारः। तस्य पुत्रकन्यादयः कर्मारः इति ज्ञातवान् आसीत्। मिश्रितवर्गस्य पुरुषः स्त्री च यदि विवाहं कृतवन्तौ। तयोः सन्तानं वर्णसङ्कर नाम्ना अभिधीयते।

शतपथब्राह्मणग्रन्थे विभिन्न-धार्मिकजीवनस्य लौकिकजीवनस्य च सीमारेखा निर्द्दिष्टाम्। सूत्रग्रन्थेषु  चतुर्णां वर्णानां विभिन्नकर्त्तव्यविषये परिष्कृतभावेन लिखितानि। याजन-अध्ययनमध्यापनञ्च ब्राह्मणानां कर्त्तव्यम्। जनानां रक्षा  क्षत्रियस्य राज्ञः कर्त्तव्यम्। शत्रुकवलात् राज्यरक्षां करोति। श्रोत्रियब्राह्मणानां , पीडितानां साधूनामपि रक्षणं च क्षत्रियस्य कर्त्तव्यम्। कृषिकर्म, गोपालनं वैश्यस्य कर्त्तव्यम्। ब्राह्मण- क्षत्रिय-वैश्यानां परिचर्चाकरणं, शिल्पकर्मप्रभृति शूद्राणां कर्त्तव्यम् । तत्कालीन समाजे नापितः, रजकः, चित्रकरः च प्रभृतयः जातिरूपेणासन्। शूद्रः यदि  बृद्धः अक्षमः वा भवति, तर्हि तस्य पालनपोषणं करोति यस्य गृहे सः कर्म अकरोत्। शूद्रः, नामाक्षरमन्त्रोच्चारणं कर्त्तुं सक्षमः, पाकयज्ञेऽपि तस्याधिकारः आसीत्। तत्कालीनसाहित्ये कुम्भकार-कर्मार-रथकार-स्वर्णकार-अग्निप्रदीपक-तैलकार-नापित-रजक-समाचारवाहकानां विषये उल्लिखितं दृश्यते।

समाजस्य प्रतिष्ठार्थं विवाहः एकान्तरूपेणावश्यकः। ऋग्वेदकाले विवाहः शृङ्खलितः। तदा आर्याः संग्रामप्रेमी, धर्मनिष्ठश्च। पुत्रलाभाय गृहस्थः देवान् प्रार्थयति स्म। पुत्रः पितरं संग्रामे सहायतां करोति। पुत्रलाभेन आर्यः पितृऋणस्य परिशोधं करोति स्म। जाया अपि पत्न्या सह विभिन्नधर्मकार्येषु अंशग्रहणं कृतवती। परिवारे अविवाहितकन्यानामुल्लेखोऽपि दृश्यते। विभिन्नोत्सवेषु कन्यानामलंकाराणि युवकानां मनांसि हरति स्म। यौवनकाले एव विवाहः अनुष्ठितः प्रायतः अभवत्। तदा कन्या स्वेच्छानुसारं, युवकोऽपि स्वाभिलाषानुसारं विवाहं कृतवन्तौ। पितामाता च प्रायतः एतादृशविवाहार्थमनुमोदयन्ति स्म।

समये समये अनुपयुक्तः पुरुषः यदा कन्यायाः पाणिग्रहणमकरोत् तदा कन्यासुनां (bride price)  प्रददाति स्म। कन्यायाः अङ्गविकृतिस्थले वराय धनप्रदानमकरोत्। कन्यापिता (यौतुक) ऋग्वेदस्य दशममण्डले ८५तम सूक्ते तत्कालीनविवाह- पद्धत्याश्चित्रं लभ्यते। वरः वरेण सह अन्ये च कन्यागृहं प्रति अगच्छत्। कन्या सुन्दररूपेण सज्जिता आसीत्। वरः कन्यायाः पाणिग्रहणं कृत्वा अग्नेः प्रदक्षिणमकरोत्। तस्मिन् दिने एव कन्या वरगृहं प्रति

आगच्छत्, तयोः मिलनाञ्चाभवत्, कन्यावरयोः मिलनान्तरमेव वैधानिकरूपेण स्वीकृतमासीत्। सुखस्वाच्छन्दार्थं प्रार्थना क्रियते। नववधूं श्वश्रुः प्रभृतयः साम्राज्ञी भवितुं आशीर्वादं प्रयच्छन्ति स्म। सतीदाहप्रथा नासीत्। क्वचित् विधवाविवाहास्यापि प्रचलनमासीत्। कदाचित् नारी सन्तोनोत्पत्तेः प्राक् यदि विधवां भवति, तर्हि तस्यानुजेन सह सन्तानोत्पादनार्थं विवाहं करोति स्म।

वैदिकार्याः एकपत्नीव्रतमाचरितवन्तः, तथापि राजन्यः ब्राह्मणाश्च बहुपत्नीं गृहीतवन्तः। महर्षेः याज्ञवल्क्यस्य कात्यायनी मैत्रेयी च पत्नीद्वयमासीत्। दाम्पत्यजीवने नैतिकता निष्ठापरा कन्याविक्रयप्रथाऽपि आसीत्। परन्तु निन्दनीया यजु-साम-अथर्व-ब्राह्मणकाले प्राप्तवयस्का विवाहोयोग्याः अभवन्। पितृकुल-मातृकुलयोः मध्ये विवाहं निवारितम्, अन्यगोत्रेषु विवाहः सामान्यरूपेण प्रचलिता आसीत्।

क्रमशः नारीणां प्रतिष्ठा क्षुर्णम् अभवत्। उपनिषद् सूत्रकालेषु विवाहः अष्टविधः इति-

१. ब्राह्मविवाहः - अलङ्कारविभूषितां कन्यां वराय प्रयच्छति कन्यापिता।

२. प्राजापत्य – सन्तानाय कृतः विवाहः।

३. आर्षः - ऋषये कन्याप्रदानम्।

४. दैव – दैवकार्यरतऋत्विजाय कन्या प्रदानम् ।

५. आसुर - द्रव्यं दत्त्वा कन्यया सह विवाहः।

६. गान्धर्व - कामासक्तो भूत्वा पितुः मातुः वा अनुमतिं न गृहीत्वा विवाहः।

७. राक्षसः - वलपूर्वकं कन्याहरणं कृत्वा विवाहः।

८. पैशाच - कैनचित् कौशलेन कन्यया साकं विवाहः।

प्रथमचत्वारः विवाहप्रकाराः प्रशस्तम्। गृह्यसूत्रे विवाहस्य समयादिविषये, वरकन्यायाः च योग्यताविषये उल्लिखितम्। सपिण्डं विवाहं सगोत्रविवाहञ्च निराकृतवान्। वरः यूवकः, स्वास्थ्यवान्, बुद्धिमान् च स्यात्।

कन्यायाः विवाहवयः विषये पार्थक्यं परिलक्ष्यते। कन्या यदा प्राप्तवयस्का जाता, तदा विवाहं करोति। अनुलोमविवाहहेतोः बहुपत्नीप्रता प्रचलिता आसीत्। आसुरविवाहे कन्यापित्रे धनं प्रदीयते। ब्राह्मविवाहे दैवविवाहे च कन्या अलङ्कारैः सुसज्जिता सति

पतिगृहं गच्छति। दाम्पत्यजीवने पुत्रकामना आसीत्। मृतपत्युः धनानामुपरि विधवापत्न्याः अधिकारमासीत्। वशिष्ठधर्मसूत्रं केषुचित् क्षेत्रेषु विधवाविवाहस्यानुमोदनं कृतवान्। पारिवारिकजीवने नारीणां स्थानं सर्वाग्रे तिष्ठति। तस्याः महत्त्वमपि सर्वाधिकम् । दुहितृ-मातृ-पत्नीरूपैः सा सर्वदा सम्मानस्याधिकारिणी। गीतगानं, नृत्यं, विभिन्नोत्सवेषु आनन्दानुभवं च सा कृतवती। पत्न्या सहैव पुरुषः धार्मिककार्यकरणे समर्थः। पत्नीरहितः पुरुषः यज्ञाधिकारात् वञ्चितोऽभवत्। कन्यां सुयोग्यां कर्त्तुं ललितकलां काव्यकलां, सङ्गीतकलां, नृत्यकलां च शिक्षयति। लोपामुद्रा-आपाला-रोमशा प्रभृतयः मन्त्रद्रष्टऋषिकारूपेण ख्याताः।

### ३.१.४ शिक्षा

प्राचीनकालस्य शिक्षापद्धतिविषये ऋग्वेदे विशेषरूपेण नोल्लेखः। ऋग्वेदे व्यङ्गात्मकमण्डूकसूक्तात् (७/१०३) तत्कालीन शिक्षापद्धतेः सूचना लभ्यते। वर्षर्त्तौः आगमने यथा मण्डूकाः रटरटायन्ते तथैव ब्राह्मणाः वेदोच्चारणं कुर्वन्तीति। सामुहिककालोलचनायाः अपि उल्लेखः दृश्यते। धार्मिकछात्राय 'ब्रह्मचारी' शब्दः प्रयुक्तः। ब्रह्मचारिणः बुद्धेः विकाशः तथा व्यक्तित्वस्य पूर्णविकाशः शिक्षायाः प्रधानोद्देश्यः। मौखिकभावेन विद्याभ्यासं प्रचलति स्म। तत्कालीन छात्राः गुरवश्च लेखनविधिं ज्ञातवन्तः वा न इति प्रश्नः समुदेति। वेदं श्रुत्वैव छात्राः आवृत्तिं कृतवन्तः। अतस्तस्य अन्य नाम श्रुतिः। लेखनसामग्रीविषये न किञ्चिदुपलभ्यते। पाठ्येषु वेद - इतिहास - पुराण - ब्रह्मविद्या - व्याकरण - गणित - निधि (chronology) वाकोवाक्य (dialectics) एकायन (ethics) - ज्योतिष - युद्धविद्या प्रभृतयः प्रधानाः।

उपनयनानन्तरं छात्रः गुरुकूले प्रविशति स्म। ब्राह्मण-क्षत्रिय-वैश्यछात्राः स्वस्वजात्यनुसारं उत्तरीयं मौञ्जीमेखलां च धारितवन्तः। नैतिकता तथा चरित्रगठनं मुख्योद्देश्यं आसीत्। आध्यात्मिकजीवने प्रवेशानन्तरं दैनन्दिनकर्माणि यथा व्रतपालनं, यज्ञकाठसंग्रहः, भिक्षाटनं, गुरुसेवाञ्च प्रधानकर्त्तव्यान्यासन्। सरलजीवनयापनं तथा उच्चचिन्ताधारापोषणं तेषां जीवनस्य मूललक्ष्यम्। छात्राः गुरुगृहे द्वादशवर्षाणि यावत् स्थलविशेषे चतुर्विंशति अथवा अष्टविंशतिवर्षाणि यावत् गुरुगृहे अतिष्ठन्।

उपकर्मोत्सवे (inauguration ceremony) श्रावणमासस्य शुक्लपक्षे अनुष्ठितः अभवत्। पञ्चषड्मासानन्तरं पौषमाघमासे वा उत्सर्गोत्सवः (अनध्ययनं) पालनोऽभवत्। धर्मसूत्रानुसारं शुक्लपक्षे वेदानामध्ययनं कृष्णपक्षे वेदाङ्गानामध्ययनमभवताम्। पठनकार्यं मुख्यतः मौखिकमासीत्, वेदस्योच्चारणं शुद्धभावेन भवेत्। परिशेषे समावर्तनोत्सवः पाल्यते स्म।

## ३.१.५ वैदिककालीनं नगरं गृहञ्च

ग्राम्यजीवनस्य वर्णना दृश्यते। 'नगर' शब्दः ऋग्वेदे नैव दृश्यते अपितु तैत्तिरीयारण्यके लभ्यते। गृहाणां समष्टिः ग्रामइत्युच्यते। ग्रामं परितः प्राचीरम् इव आसीत्। ऋग्वेदे 'पुर' शब्दस्योल्लेखः अस्ति, सम्भवतः 'पुर' शब्दः किल्ल इत्यर्थे प्रयुज्यते यत्र राज्यवासिनः वसतिस्थापनं कृत्वा शत्रुणामाक्रमणात् रक्ष्यामकरोत्।

यजुर्वेदसमये, सामवेदसमये, अथर्ववेदसमये ब्राह्मणकाले च 'हर्म्य' शब्दस्य प्रयोगः दृश्यते। तस्मिन् समये गावः अजाः, प्रभृतयःगृहपालिताः पशवः आसन्। गृहे सर्वदा गार्हपत्य अग्निः प्रज्वलितः आसीत्। वैदिकमन्त्रेषु 'गृह' अर्थेन आयतन-प्रस्त्या-वास्तु-हर्म्य-दुरोण शब्दाः प्रयुक्ताः राज्ञः सभागृहं, अध्यापनागृहं च आस्ताम्।

गृहनिर्माणार्थमुपयुक्तस्थानस्य चयनं प्रथममेव क्रियते। गृहनिर्माणार्थं वंशखण्डानि (bamboo), काष्ठं, प्रस्तरं, मूर्त्तिका, अग्निदहनोष्टिका व्यवहृताः। परन्तु निर्माणकौशलविषये न किञ्चित् लभ्यते। चत्वारः वृहत्काष्ठखण्डोपरि मूलरूपेण गृहनिर्माणं क्रियते। एतानि काष्ठखण्डानि भित्तिरूपेण गृह्यन्ते। राज्ञां प्रासादेषु सहस्त्रस्तम्भाः आसन्। आवश्यकतानुसारं गृहः हविर्धानं, अग्निशाला, पत्नीसदनं, सदस् च चत्वारि भागाः आसन्। अग्निशालायां गार्हपत्याग्निः सर्वदा प्रज्वलितः देवानां होमार्थं विभिन्नानि अग्निकुण्डानि आसन्। हविर्धाने गृहस्थस्य यागयज्ञस्य उपकरणानि नित्यव्यवहार्यपदार्थानि च आसन्। पत्नीसदने स्त्रियः न्यवसन्। अन्तःपुरः इत्यर्थे पत्नीसदनं प्रयुज्यते। सदस् वैठक गृहमभवत्। अत्र गृहकर्त्ता अन्यैः पुरुषैः सह कथोपकथनादि कार्यमकरोत्। गृहपालितपशूनां कृते क्षुद्रगृहाः आसन्। यागयज्ञार्थं निमन्त्रितातिथिनां कृते अतिथिशाला आसीत् या 'आवासी' इति कथ्यते। रोगहीनगृह्यार्थं, पशूनां कल्याणार्थं गृहरक्षार्थञ्च ऋग्वेदे 'वास्तोष्पति' देवस्य प्रार्थना क्रियते।

## गृहे व्यवहार्यपदार्थानि

वेदे शयनार्थं उपवेशनार्थं च आसनस्योल्लेखः दृश्यते। यज्ञाय कुशनिर्मितं 'प्रस्तरं' 'वर्हि' 'कूर्च' प्रभृतयः व्यवह्रियन्ते। स्त्रियः अन्तःपुरे नानाविधानि आसनानि व्यवहरन्ति स्म। 'तल्प', 'प्रोष्ठ' 'वह्य' – एतेषामुपरि शयनं कृत्वा सुखानुभवम् अकुर्वन्। बधूवरयोः मिलनं तल्पोपरि अभवत्। 'तल्पं' पल्यङ्कार्थे व्यवहृतः।
'वह्यं' स्त्रीणामुपवेशनार्थमासनं काष्ठेन मिर्मितम्। कारुकार्यखचितवह्योपरि बधूः वरश्च शयनं कुरुतः स्म।

ब्राह्मणग्रन्थात् 'आसन्दी' विषये ज्ञायते। धनजनाः उपवेशनार्थं व्यवहरन्ति स्म। गृहे नित्यव्यवहार्थं द्रोणं काष्ठनिर्मितं, दूतिश्च व्यवहृतौ आस्ताम्। यज्ञे अन्नपाकाय स्थाल्याः व्यवहारः क्रियते। सुवर्णरौप्यनिर्मितपात्राणि व्यवहृतानि। शस्यमापन यन्त्रम् 'उर्दरम्' कथ्यते। भण्डारगृहे अधिकशस्यानि स्थापयन्ति। आवश्यकस्थले व्यवहरन्ति स्म। दासीजनाः आर्यास्त्रीणां सहायतां गृहकार्ये कुर्वन्ति स्म।

## खाद्यं पानीयञ्च

वैदिकार्यस्य खाद्यं पानीयञ्च स्वास्थ्यवर्द्धकं , सात्त्विकञ्च, मुख्यरूपेण दुग्धं, दुग्धजातीयपदार्थं, घृतं, तत्कालीनसमाजस्य प्रधान खाद्यं पेयञ्च, ओदनं मुख्यमासीत्। यवनिर्मितं पिष्टकं अपूपं – दुग्धयवगुण्डमिश्रितं सुस्वादु खाद्यम्। दुग्धोदनं देवेभ्यः समर्प्यते। दध्योदनस्य प्रयोगोऽपि आसीत्। मुद्गेन सह ओदनं मुद्गोदनस्य प्रयोगः आसीत्। मुद्ग मांस (विरि) मसूर, गोधूम (गहम) प्रभृतीनामुल्लेखः दृश्यते। पुरोडाशस्य प्रयोगः यज्ञे अभवत्।

घृतस्य प्रयोगः प्रचुररूपेणाभवत्। यमेषु विभिन्नकर्मषु घृतस्य प्रयोगः दृश्यते। मांसभोजनस्योल्लेखः पर्वपर्वाणिषु क्रियते स्म। 'गौ' प्रत्यकगृहस्थस्य सम्पत्तिरूपेण परिचिता सा अघ्न्या नाम अवध्या। विभिन्न फलान्यपि वैदिकार्याः खादन्ति स्म। 'मधु' अपि व्यवहृतमासीत्। 'इक्षु' (आखु) शब्दः ऋग्वेदे, अथर्ववेदे मैत्रायणीसंहितायामपि प्रयुक्तः।

लवणशब्दस्योल्लेखः यद्यपि न दृश्यते तथापि लवणस्य व्यवहारं तैः ज्ञातं स्यात्। दुग्धं सर्वेषामादराणीयं पानीयं सोमपानमपि स्पृहणीयमासीत्, यज्ञे देवेभ्यः सोमरसं प्रदीयते।

सोमः विशेषरूपेण मुजवत् पर्वते लभ्यते स्म। सोमरसेन सह दुग्धमिश्रणेन गवाशीरं, दध्या सह दध्याशीरं, यवगुण्डेन सह यवाशीरं च प्रस्तुयते स्म। सोमपानेन शरीरे अपूर्वा उन्मादना उल्लासः उत्साहश्च वर्धते। ऋग्वेदस्य नवममण्डले सोमस्य स्तुतिः क्रियते। सोमपानं कृत्वा इन्द्रः वृत्रासुरेण सह युद्धं कृत्वा निधनं कृतवान्। सुरापानस्यापि उल्लेखः अस्ति। सुरापानेन अत्यधिका मादकता सृष्टा। अतः अहितकरं मन्यते।

## क्रीडाविनोदञ्च

ऋग्वेदसमये आर्याः यन्त्रसङ्गीतं कण्ठसङ्गीतविषये ज्ञानमासीत्। वैदिकछन्दसि उदात्तानुदात्तस्वरितस्वराणां ज्ञानमासीत्। वीणा-वाण (flute)– विगुलर् (drum) प्रभृतीनामुल्लेखः लभ्यते। स्त्रीणां सीमन्तोनयनोत्सवे नृत्य-गीतस्य विधिः आसीत्। रथदौडं प्रियं विनोदमासीत्। मृगया-द्युतक्रीडा च अतीव प्रियमासीत्।

## वेशभूषा

वैदिकार्याः सूत्रनिर्मितं रेशमवस्त्रं च व्यवहृतवन्तः। अजिन-कौशवस्त्रं-उत्तरीयं च व्यवहृतमासीत्। अजिनं मृगचर्मनिर्मितम् अथवा अजाचर्मनिर्मितं । मुनयः मृगाजिनं परिहितवन्तः। यजमानस्य पत्नी यज्ञसमये अर्धोवस्त्रोपरि कुशवस्त्रस्य परिधानं करोति। मृतजनस्योपरि ‘तार्प्य’ दीयते स्म। रक्तवर्णस्य रेशमीवस्त्रं “कौसुम्भं” पवित्रमभवत्। उष्णीषस्य प्रयोगोऽपि आसीत्। पादत्राणं सैनिकाः युद्धे व्यवहरन्ति स्म। शतपथब्राह्मणे ‘उपानह’ शब्दस्य प्रयोगः दृश्यते। अलङ्कारेषु कर्णभूषणं सुवर्णेन निर्मितं पुरुषाः व्यवहरन्ति स्म। ‘निष्क’ नामकं प्रसिद्धमलङ्कारे ग्रीवायां धारयन्ति स्म। ‘रुक्म’ कर्ण्णभूषणम्, स्त्रियः मणिमुक्तादीन् कण्ठे सूत्रेण ग्रथनं कृत्वा धारयन्ति स्म। विवाहे स्वर्णालङ्काराणां व्यवहारः आसीत्। केशविन्यासकला पुरुषाः स्त्रियश्च सर्वे ज्ञातवान् (जटाजुट) पुरुषाः कपर्दरूपेण केशवन्धनमकुर्वन्। स्त्रियः वेणीधारणं कुर्वन्ति स्म। कुटीर मुकुट इव स्त्रियः स्वर्णनिर्मितं केशविन्यासार्थं व्यवहरन्ति स्म।

वेदे चिकित्साशास्त्रविषयेऽपि उल्लेखो लभ्यते। अश्विनीकुमारौ अद्भुतचिकित्सार्थम् अस्त्रोपचारार्थं च बहुवारं प्रशंसितौ। साधारणरूपेण असुस्थता ‘यज्ञ’ इति नाम्ना परिचिता। रोगनिवारणार्थं वृहस्पतीनां स्तुतिः क्रियते। परवर्त्तीकाले चिकित्सकस्य महत्त्वं नासीत्। अथर्ववेदे अनेकेषां रोगाणां नामानि लभ्यन्ते। अथर्ववेदे तकम् ( एकप्रकारकं

ज्वरं) बहुवारमुल्लिखतम्। वैदिकार्याणां रोगविषये प्राथमिकज्ञानमासीत्। गर्भावस्थायां स्त्रीणां सुखप्रसवार्थं यत्नः क्रियते स्म। गृह्यसूत्रेषु परिवेशं परिष्कृत्यं स्यादिति महत्त्वं दृश्यते।

## ३.२ आर्थिकजीवनम्

कृषिः पशुपालनञ्च वैदिकार्याणां प्रधानजीविका आस्ताम्। ऋग्वेदानुसारं अश्विन् सर्वप्रथमं आर्यं कृषिकर्मणः शिक्षाप्रदानं कृतवान्। ऋग्वेदे परवर्त्तीग्रन्थेषु च क्षेत्रं , उर्वरं इति शब्दद्वयं प्रयुक्तमिति दृश्यते। कृषिकार्यार्थं प्रथमं भूमिकर्षणं , बीजवपनं, शस्यलवनं, शस्यमर्दनं च कृतवन्तः। शस्यमापनयन्त्रेण 'उर्दरेण' मापं कृत्वा स्थापयन्ति स्म।

### शस्येषु मुद्ग

ब्रीहि (धान्यं) यव-माष-गोधूम-नीवार-पियङ्गु-मसूर-श्यामक-तिलप्रभृतीनामुल्लेखोऽस्ति। धान्यं त्रिविदमासीत् यथा – कृष्णधान्यं, आशुधान्यं, महाब्रीहिश्च। वर्षायां वीजवपनं शरतकाले शस्यलवणादि क्रियाद्वारा आहरणम्। शस्यार्थं ते वृष्टेः उपरि मुख्यभावेन निर्भरशीलाः आसन्। जलसेचनप्रणाली तथापि ज्ञातमासीत्। शस्यविनाशकारी कीटपतङ्गविषयेऽपि उल्लेखो दृश्यते।

### पशुपालनम्

पशुपालनं तदा प्रधानव्यवसायमपि आसीत्। तदा यस्य अधिकपरिमाणेन गोधनमासीत् तदा सः धनिकः। राज्ञा राजानः अपि ऋत्विजाय गोधनं प्रतिददति। गोदोहनं त्रिवारमभवत् तदा प्रातः, मध्याह्ने, सायंकाले च। गवां विषये उल्लेखो दृश्यते। यथा – रोहितः, शुक्रः, पृथ्वि चित्रिता वा, कृष्णा इति। पणयः गोधनस्थापहरणमपि नीतवन्तः। तदा गवां कर्णेषु चिह्नं दीयते स्म। गोदनस्य रक्षार्थं 'पुषन्' स्मृतः पूजितश्च।

वैदिकग्रन्थे गवां विभिन्ननामानि अवस्थाभेदेन प्रदीयन्ते। धवलागौ 'कर्की' गर्भधारिणीगौ - 'गृष्ट' दुग्धदात्री गौ – धेना अथवा धेनु, बन्ध्यागौ – स्तरी अथवा धेनुष्टरी अथवा 'वसा'। प्रसवानन्तरं सूतवशा, अकाले यदि गोः गर्भं नश्यति। सा 'वेहत्' नाम्ना परिचिताः आसन्। तथा वसायाः हम्वा शब्दः प्रभाते आर्याणां श्रुतिमधुरं शुभसूचकमासीत्।

कृषिकर्मणि वृषाः प्रयुज्यन्ते। साधारणशब्दाः वृषाणां कृते 'ऋषभः', 'उस्रः', 'उस्रिया', यस्य वर्षद्वयमतिक्रान्तं, सः 'दित्यवाह' त्रिवर्षयुक्तः वत्स्या त्रिवत्स्यः। युवः वत्स्यः वृषः, ऋषभः, शकटादिकं यः चालयति सः अनड्वान् नाम्ना परिचितः ।

**अन्यव्यवसायाः**

तदा वणिक् व्यवसायादिकं कार्यं करोति स्म। कर्मारः कारु (स्तोत्ररचयिता) तक्षन् (carpenter) भिषक् (वैद्य), कुलाल – (potter), वाय-तन्ती-कैवर्त्त-निषाद-रथकार प्रभृतीनामुल्लेखः लभ्यते। ऋग्वेदस्य परवर्त्तीकाले शिक्षादिकार्यं ब्राह्मणानां हस्ते, राज्यरक्षादिकं कार्यं क्षत्रियाणां हस्ते, व्यवसायादिकं कार्यं शूद्राणां हस्ते, गृहकर्माणि तथा अन्यसहायककर्माणि शूद्राणां हस्ते न्यस्तानि आसन्।

मूल्यार्थे 'शुल्क' शब्दः तथा 'वस्' शब्दः च व्यवहृतौ। एकमेव मुद्रा प्रचलिता 'निष्का' नामधेया। पदार्थाणामादानप्रदानेन एव क्रयविक्रयकार्यमभवत्। गोधनमपि क्रयविक्रये व्यवहृतमासीत्। मुर्जवत् पर्वतात् स्तोमलतामानीय विक्रयं कृतवन्तः। कारिगरकर्मसु काष्ठकर्म, रथनिर्माणं, लौहकर्म, वस्त्रवयनं च प्रधानकर्माणि आसन्। काष्ठकर्मसु गृहोपयोगीवस्तूनि प्रस्तुयन्ते। रथकारः रथस्य निर्माणकमरोत्। युद्धसमये रथस्य व्यवहारः आसीत्। कर्मारः लौहपात्राणि यन्त्राणि च निर्मितवान्। वायः (तन्ती) वस्त्रवयनमकरोत्। तत्कालीनसमाजे कम्बलं, रेशमवस्त्रं, सूक्ष्मवस्त्रं, चित्रितं वस्त्रं च विभिन्नप्रकाराणि वस्त्राणि निर्मितानि आसन्। स्त्रीणामपि ज्ञानमासीत्।

तम्बा-लौह-प्रस्तर-मृत्तिकापात्राणि व्यवहरन्ति स्म। सुवर्ण-रौप्ययोः व्यवहारमपि आसीत्।

**स्थलव्यवसायः**

व्यवसायेषु पशुव्यवसायं प्रधानमासीत्। पशवः यथा- गदर्भः, अश्वः, वृषः, महिषः अष्टश्च विभिन्नकर्मषु नियोजितः अभवन्। कुकुराः शिकारकार्ये नियोजिताः।

सामुद्रिकव्यवसायविषये मतभेदं दृश्यते। ऋग्वेदे 'शतारित्रा' विशालकाय नौकायायाः उल्लेखः दृश्यते। तत्कालीनसमाजे ऋणस्योल्लेखः दृश्यते। पणिजनाः अन्यान् ऋणं प्रयच्छन्ति स्म।

जनाः अश्वेन गजस्योपरि , उष्ट्रेण यातायातं कुर्वन्ति स्म। साधारणजनाः पादाभ्यां गमनागमनमकुर्वन्। जलयाननौकायाः उल्लेखः दृश्यते। नौका-अरित्र-नाविकः-अरितृ इति कथ्येते। विपदशून्ययात्रार्थं इन्द्राय ते स्तुवन्ति स्म। राजानः रथेन गच्छन्ति स्म। शकटस्य व्यवहारेऽपि दृश्यते। शकटेन शस्यप्रभृतीनां आनयनं कुर्वन्ति। क्षुद्र शकटं - 'गोलिङ्ग' इत्युच्यते। कदाचित् यानं मनुष्याः कदाचित् पशवः वहन्ति स्म। इत्थं यानं मनुष्यवाहीयानं, पशुवाहीयानञ्च आस्ताम्।

## ३.३ राजनैतिकपरिस्थितिः

वैदिकसमये राजतन्त्रशासनपद्धतिरासीत्। चैत्रप्रभृतयः राजानः सरस्वतीनदीतीरे अवसन्। दानस्तुतौ बहूनां राज्ञां उल्लेखः दृश्यते। राज्ञः विशालसौधस्य वर्णनाऽपि दृश्यते। राज्ञः वैभवशालिनः आसन्। देवाः असुरैः पराजिताः भूत्वा इन्द्रं स्वराजारूपेण निर्वाचितवन्तः। अतः राजानिर्वाचनस्य सूचना लभ्यते। राजा धनुर्विद्यां, रथचालनां, वेदवेदाङ्गादि विद्यां अन्यासु विद्यासु युद्धादिविषये च निपुणः आसीत्। वेदे ऐतरेयब्राह्मणे च राजा, राजाधिराजः, सम्राट्, सार्वभौम, एकराट् प्रभृतिपदानामुल्लेखो लभ्यते। राज्ञः राजतिलकसमये यज्ञानुष्ठानमकुर्वन्। यथा- वाजपेययज्ञं, राजसूययज्ञं, अश्वमेधयज्ञं च । यः राजा राजसूययज्ञमकरोत्, सः एकराट्, यः वाजपेययज्ञमकरोत् सः सम्राट्, अश्वमेधयज्ञकारीराजा स्वराट्, पुरुषमेधयज्ञकारी राजा विराट्, सर्वमेधयज्ञकारी राजा सर्वराट्रूपेण परिचिताः अभवन्। स्वराज्य-वैराज्य-राज्य-अधिराज्य प्रभृति शब्देभ्यः सर्वतत्र-स्वतन्त्र-स्वाधिपत्यप्रभृतिराज्यविषये सूचना लभ्यते।

राजा अपि शासनरक्षार्थं इन्द्र-वृहस्पति-अग्नि-गृहस्पतिप्रभृतिदेवानां स्तुतिम् अकरोत्। वृक्षलता-कृषिकर्म-दण्डविधानार्थं पशुपति-इन्द्र-मित्र-वरुण-सत्य-धर्मादि देवानां स्तुतिम् अकरोत्। राज्ञः दृढता-वीरत्व-वाक्शक्तिवृद्ध्यर्थं ब्राह्मणाः सप्तनदीनां जलैः अभिषेकं कारितवन्तः। राजा अपि सर्वान् नियमान् पालितवान्। राज्यस्य रक्षणं, कृषेः उन्नत्यर्थं, प्रजानां भौतिकाध्यात्मिकवृद्ध्यर्थं तथा प्रजानां सर्वविधोन्नत्यर्थं राज्ञः परमं कर्त्तव्यमासीत्। राजा दण्डधारी अदण्ड्यश्चासीत्।

तैत्तिरीयोपनिषदानुसारं राज्ञः द्वादशमन्त्रीयुक्तः मन्त्रीमण्डल; आसीत्। यथा- १) पुरोहितः, २) राजन्यः, ३) परिभृत्, ४) महिषी, ५) सूतः, ६) सेनानी, ७) क्षत्रियः, ८) कोषाध्यक्षः, ९) अक्षावापः (द्युतक्रीडायाः अधिकारी) १०) भागदूहः (करग्रहणस्याधिकारी), ११) ग्रामणी, १२) आखेटसहकारी (मृगयाक्रीडाविनोदे सहायकः) मैत्रायणीसंहितानुसारं राज्ञः मन्त्रीमण्डलस्य संख्या सप्तत्रिंशत्। (३७)। आश्वलायनगृह्यसूत्रानुसारं युद्धस्य प्रारम्भे पुरोहितः राज्ञः पश्चितदिशि स्थित्वा धनुः शरं च राजानं प्रयच्छति, तदा ऋग्वेदस्य मन्त्रपाठं करोति स्म। अश्वं लक्षीकृत्य मन्त्रपाठमपि अभवत्। अनन्तरं राजा रथोपरि गत्वा पुनः मन्त्रस्यावृत्तिमकरोत्। ब्राह्मणाः अपि परिषदं गठितवन्तः। राज्ये यदा द्विधापरिस्थितिर्जायते, तदा ते आदिशन्ति स्म।

### सभा समितिश्च

सभा नाम विधानसभा। सभायां राजनैतिकालोचना, सामाजिकालोचना, विनोदं, द्युतक्रीडा कृता आसीत्। सभायाः अधिवेशनात् प्राक् सभ्याः सामान्यं कर्मानुष्ठानमकुर्वन्, तत्र व्यवहृतः अग्निः 'सभ्य' उच्यते। स्त्रियः तत्र न गच्छन्ति स्म। यर्जुवेदसंहितायां 'सभा' ग्राम्यविवादस्य विचारालयरूपेण गृह्यते। सभासमित्योर्मध्ये सामान्यं पार्थक्यम् आसीत्। लड् उइग् महोदयस्य मतेन सभायां साधारणजनाः ब्राह्मणाः, धनिकाः अंशग्रहणमकुर्वन्। सभायां विशिष्टसभ्याः समितौ सर्वसाधारणजनाः गच्छन्ति स्म। सभायां राज्यस्य वृद्धाः भागं नीतवन्तः। न सा सभा यत्र न सन्ति सन्थाः। अभियुक्तजनानां अपराधनिर्णयार्थं, दण्डविधानार्थं च सभायाः मुख्योद्देश्यः।

### शासनपद्धतिः

वैदिककाले शासनपद्धति न उन्नता आसीत्। क्षुद्राः राज्याः राष्ट्रम् उच्यते। मुख्यतः ग्राम्यशासनमासीत्। 'कुलपा' शब्द, 'ग्रामणी' – अर्थे प्रयुक्तः। ग्रामणी राजनैतिक-युद्धजनितसमस्यां परिचालयति स्म। संगृहितृ (कोषाध्यक्षः) अक्षवापः (द्युतक्रीडाध्यक्षः) राज्यशासने सहायतामकुरुताम्।

### करग्रहणम्

करग्रहणसंस्था शासनस्य प्रधानांशः। वन्यजातद्रव्य-कृषि-व्यापारलब्धपदार्थभ्यः करसंग्रहमभवत्। विभिन्नपदार्थानां कृते विभिन्न जनानां कृते च करपरिमाणं भिन्नमासीत्।

राज्यपरिवारस्य जनाः, क्षत्रियाः ये युद्धे साहार्यं कुर्वन्ति, ब्राह्मणाश्च करं न प्रदत्तवन्तः। राजा प्रजानां पुण्यानां एकषष्ठांशकरं गृहीतवान्।

**विचारालयः**

धर्मशास्त्रानुसारम् अपराधीजनः दण्डितोऽभवत्। अपराधकार्येषु चौर्यं, अत्यधिकं मद्यपानं, पशुनां चौर्यं, भ्रात्रा सह भगिन्याः विवाहः, अवैधप्रणयः, नारीणामपहरणं, भृणहत्या-नरहत्या-ब्रह्महत्या च अपराधरूपेण गृह्यन्ते। उतप्तपरशु श्रुत्वा विचारः क्रियते स्म। अपराधिनः हस्तं उतप्तपरशुना ज्वलितः भवति। निरपराधजनस्य न किमपि भवति। वैरदेयप्रथापि प्रचलिता आसीत्। क्षत्रियस्य हत्याकरणे एकसहस्त्रं गाः, वैश्यस्य हत्यायां एकशतं गाः, शूद्रस्य हत्यायां दश गाः प्रदाय मुक्तिं लब्धवान्। आपस्तम्बधर्मसूत्रेऽस्य प्रमाणं लभ्यते।

## ४.१ धार्मिकजीवनम्

ऋग्वेदे बहुदेवतानां वर्णना दृश्यते। अतः तत्र बहुदेवतावादं प्रचलितमासीत्। विशिष्टयज्ञानुष्ठानसमये ऋषिं यं देवमाह्वयति, सा एव प्रभावशाली महीयान् श्रेष्ठश्च। स्तुतिसमये वरुणः श्रेष्ठः देवरूपेण परिगणितः। इन्द्रः अपि सर्वश्रेष्ठदेवरूपेण प्रशंसितः अभवत्।

वैदिकदेवाः त्रिविधाः विभज्यन्ते। १) पृथ्वीस्थानीयाः (terrestrial), २) अन्तरीक्षस्थानीयदेवताः (aerial or intermediate), ३) द्युस्थानीयदेवताः (celestial)। पृथिवी-अग्नि-सोम-वृहस्पतिप्रभृतयः पृथ्वीस्थानीयदेवताः। इन्द्रः-अपाम्-नयात्-रुद्र-वायु-पर्जन्य-आप-मातरिश्वान्- एते अन्तरीक्षस्थानीयदेवताः। द्यौस्-वरुण-मित्र-सूर्य-सवितृ-पुषन्-विष्णु-उषस्-अश्विनौ - एते द्युस्थानीयदेवताः।

### ४.१.१ द्युस्थानीयदेवताः

**विष्णुः**

सौरदेवतासु विष्णुः अन्यतमः। ऋग्वेदे अल्पसंख्यकेषु सूक्तेषु आहूतः। व्यापनशीलत्वात् सः क्रियाशीलसूर्यस्य प्रतीकः।

विष्णोः पादत्रयं विद्यते। अतः ऊरुक्रमः। ऊरुगायः इति विशेषणाभ्याम् आहूतः। पादत्रयविषये विभिन्नविदुषां भिन्नमतानि परिलक्ष्यते। शकुपुणेः मतेन पृथिवी-अन्तरीक्ष-आकाशमार्गान् अतिक्रम्य सूचयति। और्णवाभस्य मतेन त्रिक्रमणात् प्रातः- मध्याह्न - सायंकालविषये च सूचितः। म्याक्सम्युलरमतेन सूर्यस्य दैनन्दिनयात्रायाः क्रमत्रयाणां विषये सूचितः। बालगङ्गाधरतिलकमहोदयः सूर्यस्य आह्निकगतिविषये सूच्यते।

**मित्रः**

मित्रः सर्वदा वरुणेन सह आहूतः। मित्रः सूर्यस्य मङ्गलमयशक्तेः प्रतिनिधिः। सः मनुष्यान् क्रियाशीलान् करोति। सः स्वर्गं मर्त्त्यं च दृढभावेन धारयति। उषायाः आगमनात् प्राक् अग्निः मित्रमुत्पादयति। सोऽग्निः प्रज्वलितानन्तरं मित्रः भवति अर्थात् मित्ररूपेण प्रतिभाति।

**उषस्**

ऋग्वेदे विंशतिसूक्तेषु आहूतः। समग्रवैदिककवितासु उषा सौन्दर्यस्य प्रतीकम्। उषा शब्दः 'वस् दीप्तौ' धातोः निष्पन्नः। अस्यार्थः प्रकाशमान् दीप्तिमान्। नर्त्तकी इव सुन्दरवस्त्रपरिधानं कृत्वा दिग्वलये उदितो भवति। सा हिरण्यवर्णा सुवर्णमयरथेनागच्छति। अन्धकारं दूरीकृत्य यज्ञकर्त्तारं निद्रायाः उत्थितं कारयति। उषा सूर्याय मार्गं प्रस्तुतं करोति। उषा 'मघोनी' (दानशीला), प्रचेता ( उत्तमज्ञानसम्पन्ना), सुभगा सूनरी (सुन्दरी) विश्ववारा (सर्वैः वरणीया) ऋतावरी (प्रकृतेः नियमपालनकारिणी) प्रभृतिभिः विशेषणैः अलङ्कृता।

**वरुणः**

वरुणशब्दः ग्रीक्शब्देन ouranos (आकाशेन) सह वैदिकदेवता समाना। अल्पसंख्यकैः सूक्तैः वरुणः ऋग्वेदे आहूतः। तस्य चरित्रं मनुष्यस्य चरित्रेण सह अधिकमात्रेण संपृक्तः। वरुणः रथेन यातायातं करोति। सः मनुष्य इव खादति पिवति च। सूर्यस्तस्य नेत्रं । अतः बहुदूरेस्थितं पदार्थमपि सः द्रष्टुं शक्नोति। सः उज्वलवस्त्रं परिदधाति, मायां विस्तारयति। सः स्वर्गलोकं, पृथिवीं, वायुं च रक्षति। सः सम्राट् स्वराट् नाम्ना प्रसिद्धः। 'वृ' आवरणे इति धातोः निष्पन्नः शब्दः वृणोति सर्वमित्यर्थे सर्वान्नाच्छादयति। सः ऋतस्य धर्त्ता, नियमस्य धारणकर्त्ता। ऋतं नाम सत्यं। सूर्योदयः, सूर्यास्तः, ऋतोः आगमनं प्रभृतयः प्राकृतिकक्रमं ऋतेन नियन्त्रितम्। वरुणः ऋतुगोपा अर्थात् ऋतोः पालनकर्त्ता। वरुणस्य निर्देशेन विश्वस्य सर्वाणि कार्याणि परिचालितानि भवन्ति। सः धृतव्रतः अर्थात् (one who maintains or observes the law) सः सर्वज्ञः, जलस्य देवतारूपेणापि वर्णितः । मित्रेण सह वरुणः सिन्धुपति अर्थात् नदीनां पतिरूपेण वर्णितः। आचार्यसायणस्य मतेन सः जलाभिमानी देवता। वरुणः सर्वज्ञः सर्वशक्तिमान्। सः उरुचक्षाः तथा विश्वतः चक्षुः। सः मनुष्यहृदयस्य कामनां भावनां च जानाति। सः कर्मद्रष्टा

ईश्वरस्य प्रतिनिधि। ऋग्वेदस्यानुशीलनात् ज्ञायते यत् वरुणस्य स्थानमतीव महत्त्वपूर्णमासीत्।

**सवितृ**

सविता हिरण्मयदेवता। तस्य वायु-जिह्वा-चक्षु-रथप्रभृतयः स्वर्णमयाः। सः ऋतमनुसरति। वेगगामिअश्वैः परिचालनेन रथेन उपविश्य स्वर्णिमकिरणं विकीर्य जनानां पापानि विनश्य आगच्छति। प्रत्येकः ब्राह्मणः प्रातः सायं च गायत्रीमन्त्रजपेन सवितृदेवं स्मरति।

**सूर्यः**

वैदिकसूर्यः अवेस्ताग्रन्थे वर्णित सूर्येन सह समानः। स्वर् प्रकाश इति धातोः निष्पन्नशब्दोऽयम्। अदिति द्योस् – अनयोः पुत्रः, उषा तस्य कन्या। सूर्यस्य रथं सप्तअश्वाः नयन्ति। सः मित्रवरुणयोः चक्षुद्वयम्। सर्वेषां स्थावरजङ्गमानां रक्षकः। शुभाशुभकर्मणां द्रष्टा, मनुष्यान् कर्माय प्रेरयति।

**पुषन्**

सूर्यस्य प्रतिनिधिः। पोषणकर्त्ता - इत्यर्थे गृहीतः। तस्य मुखे श्मश्रुः विद्यते। मस्तके जटा विद्यते। स्वर्णालङ्कारं धारयति सः।

**अश्विनौ**

वैदिकसाहित्ये इन्द्र-अग्नि-सोमः- एतेषामनन्तरं अश्विनौ इति युग्मदेवयोः स्थानं भवति। सूर्या तयोः सौन्दर्येण विमोहिता सन्ती विवाहं कृतवती। अतस्तां तौ रथेन नयतः। अश्विनौ 'द्यौस्' – अस्य पुत्रौ। तौ मधुपानं कुरुतः। सुवर्णरथेन भ्रमतः । तस्य रथं महिषं रासभं वा आकर्षयति। रथेन सः द्यावापृथिवीं भ्रमति। तौ स्वर्गवैद्यौ रूपेण कीर्त्तितौ । मर्त्त्यस्य मानवान् रोगमुक्तान् कुर्वन्ति। अनेकस्थानेषु तयोः परोपकारिताविषये शल्यचिकित्सायाः कौशलविषये च परिलक्षितम्।

### ४.२.२ अन्तरीक्षस्थानीयदेवाः

**इन्द्रः**

इन्द्रः वैदिकयुगस्य जातीयदेवतारूपेण परिचितः। ऋग्वेदे २५० सूक्तेषु आहूतः। इन्द्रः युद्धप्रियः। योद्धरूपेण वर्णितः। मानवीयगुणैः विभूषितः द्यौस् – अस्य पुत्रः। सः सोमपा। सोमपानेन तस्य उत्साहः शौर्यश्च शतगुणेन वर्द्धितो भवति। इन्द्रस्य वलवीर्यस्य वर्णनः बहुत्र दृश्यते। तस्य हस्ते मुख्यमायुधं वज्रमस्ति।

इन्द्र शत्रुणां पुरं दुर्गं च ध्वंसीकृतवान्। अतः सः पुरभिद्। अनेकस्थानेषु तस्य मङ्गलमयकर्मणः उल्लेखं लभ्यते। मरुत्गणः इन्द्रं युद्धे सहायतां कुर्वन्ति। इन्द्रः वृत्रं, दासं, अन्यान्य शत्रुन् पराहतं कृतवान्। इन्द्रः वर्षायाः देवता। आर्याणां रक्षार्थं मङ्गलविधानार्थं सः आहूतः। आध्यात्मिकदृष्ट्या इन्द्रः परमात्मा, आधिदैविकदृष्ट्या सः श्रेष्ठदेवः। आधिभौतिकदृष्ट्या सः महान् योद्धा च ।

**मरुतः**

मरुतां पिता रुद्रः, माता च गोरूपा पृष्णिः। ते स्वतन्त्ररूपेण तथा अन्यैः सह अपि आहूताः। स्वर्गस्य गायकरूपेण परिचिताः इन्द्रस्य प्रधान सहायकाः। इन्द्रस्य सहायतां नीत्वा सर्वान् कार्यान् कुर्वन्ति, दुःखं हरन्ति, रोगान् दूरीकुर्वन्ति।

**रुद्रः**

वेदे रुद्रस्य महत्त्वं स्वल्पमेव दृश्यते। केवलं स्वतन्त्रभावेन तथा अन्यैः देवैः सह सः केवलं पञ्चाशतवारमाहूयते। शुक्लयजुर्वेदस्य रुद्राध्याये तथा अथर्ववेदस्य रुद्रस्य महत्त्वमुल्लिखितम्।

ऋग्वेदे रुद्रस्य मानवीयरूपस्य वर्णनमुपलभ्यते। मस्तके जटाहेतोः 'कपर्दी' कथ्यते। सहस्त्रनेत्रत्वात् सः 'सहस्राक्षः' इत्युच्यते। तस्य कण्ठः नीलत्वात् नीलग्रीवः। कण्ठप्रदेशस्य उज्वलत्वात् शितिकण्ठः, मुण्डितकेशत्वात् व्यप्तकेशः च कथ्यते। पिनाकधनुर्धारणं करोति। हस्ते खड्गं वज्रं च धारयति। तस्य वज्रस्य नाम सृक। सः पराक्रमी योद्धा, नित्ययौवनेन परिपूर्णः। स्वपराक्रमेण पर्वतात् नदीजलं मुञ्चति। रुद्रस्य

पत्नी अम्बिका इति वाजसनेयीसंहितायां उल्लिखितम् । तैत्तिरीयारण्यके तस्या नाम पार्वती केनोपनिषदि उमाहैमवती नाम्ना ख्यातः।

रुद्राध्याये भवः, शर्वः, उग्र;, भीमः, पशुपतिः प्रभृतयः पर्यायवाची नामानि दृश्यन्ते। रुद्र; सकलजगतः स्वामी।

रुद् धातोः यदरोदीत् तस्मात् रुद्रः इति व्युत्पत्तिः। रोदयतीति रुद्रः वा अन्यः एकः अर्थः। कदाचित् रुद्रः प्रलयस्य देवतारूपेण वर्णितः।

रुद्रः अग्नेः प्रतीकः। अग्निशिखा उद्धर्वमुखी। अतः उर्द्धलिङ्गस्य परिकल्पना क्रियते। अग्निः वेदमध्ये प्रज्वलितःभवति। अतः जलाधारीणां मध्ये शिवः शोभते। एतदर्थं तस्य मस्तकोपरि जलाभिषेकं क्रियते।
रुद्रस्याष्टमूर्त्तयः अष्टभौतिकपदार्थानां प्रतिनिधिस्वरूपः। रुद्रः अग्निस्वरूपः, शर्वः जलस्वरूपः, पशुपतिः औषधिस्वरूपः, उग्रः - वायुस्वरूपः, अशनि-विद्युत्स्वरूपः, भवः - पर्यन्यस्वरूपः। महान्देवः - चन्द्रमा, ईशानः - आदित्यः।

रुद्रः स्व भक्तानां दुःखं रोगं च दूरीकरोति। जगतः मङ्गलं विदधाति।

### ४.३.३ पृथ्वीस्थानीयदेवता

वेदे २०० सूक्तैः अग्निदेवस्य स्तुतिः क्रियते। इन्द्रदेवः योद्धृणां देवता, परन्तु अग्निः गृहस्वामिनः देवता। अग्नेः स्वरूपविषये वर्णनं दृश्यते। सः देवानां मुखस्वरूपः। देवेभ्यः समर्पितः हविः सः नीत्वा प्रयच्छति। मानवजीवनेन सह तस्य संपृक्तिः अस्ति। । अग्निः यज्ञस्य ऋत्विक्, उपासकस्य भ्राता, पिता पुत्रश्च। गृहस्य पुरोहितः। नववधू गृहगमनानन्तरं प्रथममेव अग्निं परितः परिभ्रमति। सः जातवेदः। सः सर्वेषां विषये जानाति। होमं वहति। अतः वह्निः हव्यवाहनश्च। उपासकेभ्यः सः प्रचुरं धनं सुखं च प्रयच्छति।

**वृहस्पतिः**

वेदे वृहस्पति 'ब्राह्मणस्पति' इत्युच्यते। सः मन्त्राणां पतिः। अग्निदेव इव सः गृहस्य पुरोहितः। वृहस्पतेः कान्तिः स्वर्णिमः। हस्ते धनुः शरं, परशुं च धृतवान्। सः मघवन् (दानशीलः) इति उच्यते। वृह् धातोः निष्पन्नोऽयं शब्दः। अर्थः मन्त्राणां पतिरिति। अग्नेः प्रतीकः इव ज्ञायते।

**सोमः**

वेदे इन्द्राग्नयोरनन्तरं सोमस्य प्राधान्यं परिलक्ष्यते। प्रायतः १५० सूक्तेषु सः आदृतः। ऋग्वेदस्य नवममण्डलं सोममधिकृत्य एवास्ति। सोमलतायाः संपीडनं, निषेचनं, सम्मिश्रणं, संशोधनं च – एताः प्रक्रियाविषये विस्तृतरूपेण वर्ण्यते। सोमरसेन रस दधिदुग्धयवादि मिश्रणेन सुस्वादुपानीयं प्रस्तुयते।द्युस्थानीयदेवेषु पृथ्वी-द्योस्, केषाञ्चित् नदीनां वर्णनं विद्यते। विशेषभावेन सरस्वत्याः वर्णनं विद्यते। वेदेषु देवतानां स्थानं महत्त्वावहम्। मानवः प्रत्यहं प्रकृतिदेव्याः नानालीलाः पश्यति। वैदिककालस्य महर्षयः तस्याः तल्लीलाः अवधारयितुं विभिन्नाः देवताः अकल्पयन्। महर्षीणां विश्वासोऽयं यदासां देवतानामनुकम्पया एव सर्वाणि कार्याणि सम्पद्यन्ते। जगति घटमानानां सर्वासामपि घटनानां कारणभूताः एते देवाः।

ऋग्वेदे हि देवाः प्राणशक्तिशालित्वात् 'असुरः' इति प्रोक्ताः। प्रतीच्यानां प्रधानां देवताः उद्दिश्य विचारोऽयं यत् भौतिकघटनोपपत्त्यै प्राकृतिकानि दृश्यानि देवतात्वेन परिकल्पितानि। ऋग्वेदस्य आदिमे युगे वहुदेवतानां सत्ता अभ्युपेता बभूव। गच्छता कालेन सति मानसिके विकाशे देवतानां तासामेक एवाधिपतिः कल्पितः अभूत्। पुरुषसूक्ते सर्वेश्वरवादः स्पष्टतः समुपस्थापयन् दृश्यते। परं पश्चिमीयानामेष देवताविषयको विचारोः नावितिथः देवतावादो न भौतिक एतावान्।

यास्केन निरुक्ते दैवतकाण्डे देवतास्वरूपविवेचनं हि अतिशयविशदतया अनुष्ठितम्। जगतो मूले एकैव महत्ताशालिनी महाशक्तिः शोभते। सा निरतिशयऐश्वर्यशालिनीत्वात् ईश्वरः इति गीयते। सैव शक्तिः बहुभिः प्रकारैः स्तुता-

महाभाग्यात् देवतायाः एक एव आत्मा बहुधा स्तूयते। एकस्यात्मनो देवाः प्रत्यङ्गानि भवन्ति-वेदे यद्यपि अग्नि-इन्द्र-वरुण-रुद्र-मरुतप्रभृतिदेवतानां नामानि ज्ञात्वा बहुदेवतावादविषये सूचना लभ्यते। परन्तु तन्न। अन्तःसाक्षीभूतेन उपास्य देवः एक एव। सः प्रजापतिः ओम्, परमेश्वरश्चेत्यादिभिः नामभिः अभिहितः। इन्द्राग्निप्रभृतयः एकस्य देवस्य विभिन्नगुणाः एव। तथा उच्यते-

**इन्द्रं मित्रं वरुणमग्निमाहुरथो**

**दिव्यः स सुपर्णो गरुत्मान्।**

**एकं सद् विप्राः बहुधावदन्त्यग्निं**

**यमं मातरिश्वानमाहुः ।। (ऋग्वेद – १.१६४)**

रक्षाकरणार्थे परमेश्वरस्य नाम ओम्, सर्वव्यापकत्वात् विष्णुः, दुष्टदण्डप्रदानकारीत्वात् रुद्रः, मङ्गलकारीत्वात् कल्याणकारीत्वात् च शिवः, सर्वेषां जगतः उत्पत्तेः कारणात् सविता, ज्ञानस्वरूपत्वात् अग्निः, अविनाशित्वात् आदित्यः, ऐश्वर्ययुक्तत्वात् इन्द्रश्चेत्यादिभिः नामभिः स्तूयते।

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**

**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।। (यजुर्वेदः ३२.१)**

**सोऽर्यमा स वरुणः सः रुद्रः स महादेवः ।। (अथर्ववेदः - १३.४.४)**

**सोऽग्निः स ३ सूर्यः स ३ महायमः ।। (अथर्ववेदः १३.४.५)**

अर्थात् स एव अग्नि-सूर्य-महायमनामभिः स्तुतः। अस्मादिदं स्पष्टं भवति यत् अग्नि-इन्द्रप्रभृतिनामानि उपास्य देवस्य विभिन्नगुणाः सन्ति।

## ५.१ आदर्शप्रश्नाः

**Group - A**

**१. प्रश्नानामुत्तरं पञ्चाशतत्तोरद्विशतं परिमितैः पदैः(250) विशदयत।** **15**

क) भारतेतिहाससङ्कलने प्रामाणिकमूलस्त्रोतांसि कानि सन्ति? तेषां विवरणं दत्त।

ख) वैदिककालस्य साधारणजीवनचर्यायाः आलेखं प्रस्तौत।

ग) वैदिककालस्य राजनैतिकजीवन/आर्थीकजीवनविषये विवरणं दत्त।

घ) सरस्वतीसभ्यतायाः परिचयं देहि।

ङ) सिन्धुसभ्यतायाः सामाजिकजीवनपद्धतिं विवृणुत।

च) वैदिकसमाजे शिक्षाव्यवस्थां निरूपयत।

छ) वैदिकयुगस्य पूजाविधिम् उपासनापद्धतिं च वर्णयत ।

**Group - B**

**२. प्रश्नानां संक्षिप्तमुत्तरं पञ्चाशत् पदैः (50) विवृण्बुत।** **5**

क) सरस्वती नदी

ख) सिन्धुसभ्यतायां स्नानागारः

ग) परिव्राजकानां विवरणम्

घ) वेदकालीन नारीशिक्षा

ङ) सिन्धुसभ्यतायाः नगरनिर्माणयोजना

च) वैदिकजीवनधारा

छ) उपनिषदीयदर्शनम्

ज) सिन्धुसभ्यतायाः/ सरस्वतीसभ्यतायाः वैशिष्ट्यम्

**Group - C**

**३. प्रश्नानामुत्तरं द्वयेन वाक्येन लिखत।** **२**

क) ऋग्वेदेसमये वर्णव्यवस्था

ख) वैदिककालीनपरिवारः

ग) वर्णाश्रमव्यवस्था

घ) वैदिककाले गृहनिर्माणार्थमुपकरणानि कानि

ङ) वेदिककाले मुख्यं पानीयम्

च) स्थलव्यवसायम्

छ) सामुद्रिकव्यवसायम्

ज) सभा समितश्च

झ) पृथ्वीस्थानीयदेवताः

ञ) अन्तरीक्षस्थानीयदेवताः

ट) द्युस्थानीयदेवताः

## ६.१ सहायकग्रन्थाः


१. दाश, अभिन्नचन्द्रः,वैदिकसाहित्य ओ संस्कृति, (ओडिआ), अप्टिमा (अफसेट्) प्रिण्टस्, सूताहाट, कटक-१, १९९८

२. पति, निरञ्जनः, वेद ओ वैदिकप्रकरण, (ओडिआ), विद्यापुरी, कटक-२, २०००